# वेव्ससंस्थया समायोजितम् अन्ताराष्ट्रियसंस्कृतसम्मेलनम्

डॉ. रणजित बेहेरा

संस्कृतविभागा:, दिल्लीविश्वविद्यालय

भारतीयविद्याभवने समायोजिते चतुर्दिवसीयान्ताराष्ट्रिसम्मेलने विश्वस्य विभिन्नेभ्य: देशेभ्य: तथा भारतस्य प्राय: सर्वेभ्य: प्रदेशेभ्य: 150 विद्वांस: भागं गृहीतवन्त:। विद्वद्भि: वैदिकज्ञानस्य विविधा: पक्षा: सविस्तरं विचारिता: समुद्घाटिताश्च। विश्वस्य विविधानानां समस्यानां समाधानं भारतीयविद्याया: वैदिकज्ञानस्य च सैद्धान्तिकदृष्ट्या कर्तुं शक्यते। अमेरिका-कनाडा-यूके-फ्रान्स-इसराईल-नेपाल-भारतादीनां देशानां भारतविद्याविदां वैदिकविदुषां च सम्मेलनस्यास्यायोजनं वर्ल्ड एसोसिएशन फार् वैदिक स्टडीज तथा वाइडर एसोसिएशन फार् वैदिक स्टडीज इत्याभ्यां संस्थाभ्यां भारतीयविद्याभवनस्य सौजन्येन नवदेहलीस्थ-भारतीयविद्याभवनस्य मुंशी-मेमोरियल-सभागारे 15.12.2016 त: 18.12.2016 पर्यन्तं साफल्येन समायोजितम्।

सम्मेलनस्यास्योद्धाटनसमारोहे भारतीय-विद्या-भवनस्य निदेशक: श्रीयुत: अशोकप्रधान: सर्वेषां विदुषां स्वागतं विधाय वैदिकज्ञानं सर्वेषां कृते आवश्यकमिति प्रत्यपादयत्। यदि मानवेषु विभेदस्य कारणं धर्म इति स्वीक्रियते चेदिदं स्मरणीयं यत् समेषां धर्माणामाविर्भाव: वैदिकधर्मानन्तरं जात इति। पुनरपि तेन निगदितं यत् सर्वासां वैज्ञानिकधारणां मूलस्त्रोतांसि वैदिकसंहितासु एव विद्यन्ते। वेव्स-अन्ताराष्ट्रियस्य निदेशक: श्रीयुत: धीरेन्द्रशाह: वैदिज्ञानस्य व्यावहारिकोपयोगिता प्रतिपाद्य वेव्स-संस्थाया: उद्देश्यानां तथा विविधकार्यक्रमाणां विषये प्रावोचत। वेव्स-भारतस्य उपाध्यक्ष: प्रो. लल्लनप्रसाद: उक्तवान् यत् वैदिकऋषिप्रज्ञाया: सुक्ष्मान्वेषणमस्माभ: विधातव्यमिति।




मुख्यातिथिपदमलंकुर्वता उत्तराखण्ड-संस्कृत-विश्वविद्यालस्य भूतपूर्व-कुलपतिना प्रो. महावीरअग्रबालेन भणितं यत् वैदिकदेवतायां वैदिकोपासनायां च निहितानि वैज्ञानिकतथ्यान्यवलोकनीयानीति। वैदिकऋषिभि: सर्वमिदं विज्ञाय प्राकृतिकशक्तय: स्तुता:। अवसरेऽस्मिन् ट्रिनीडाडत: समुपागता डा. इन्द्राणी रामप्रसाद:, कनाडात: श्रीयुत: जफरी आर्मस्ट्रग:, अमेरिकाया: महर्षि युनिवर्सिटी आफ मैन्जमेन्ट इत्यस्य संकायाध्यक्ष: प्रो. रोवर्ट एच्. श्रीन्डर: च विशिष्टातिथिरूपेण समुपस्थिता: आसन्। उद्घाटनसत्रे वेव्स इत्यस्या: संस्थाया: पंचमप्रकाशनस्य 'भारतीय परम्परा में स्वास्थ्य एवं सुख' इत्याख्यस्य पुस्तकस्य लोकार्पण विहितम्। प्रो. शशितिवारीद्वारा सम्पादितमेनत्पुस्तकं प्रतिभाप्रकाशनेन प्रकाशितम्। वेव्स इत्यस्य अन्ताराष्ट्रियाध्यक्ष: श्रीयुत: शशिकेजरीवाल: स्वकीयाध्यक्षीयभाषणे प्रावोचत् यदिदानीं भारते विद्वांस: शोधार्थिनश्च वैदिकविद्याया: अध्ययनाध्यापने प्रयत्नशीला एव। सम्मेलनेऽस्मिन 130 शोधपत्राणां वाचनं सञ्जातं येषु प्राय: 20 वैदेशिक-विद्वांस: वर्तन्ते। वैदेशिकविद्वत्सु श्रीयुत: कोर्नाड इस्ट, श्रीयुत: जफरी अर्मस्ट्रांग:, डा. नरहरिआचार:, डा. कोमा कपेन्टर, डा. कुमारनोचर:, श्रीमती मधुशर्मा, डा. मिकल स्टर्नफील्ड, डा. रेनी रवेह:, डा. जोन जे क्लिमेन् प्रभृतय: प्रमुखा एव। हैदराबादत: वैज्ञानिक: वेदविद् च डा. भक्तिनिष्कामशान्ता, डा. भाक्तिविज्ञानमुनि: डा. जगन्नाथ: च; इन्दोरत: डा. चन्द पी.त्रिवेदी; देहलीत: प्रो. एम.एम. बजाज:, प्रो.आर.एस. कौशल; प्रो. रमेशभारद्वाज:, प्रो. शारदाशर्मा, डा. उर्मिलारुस्तगी, डा. प्रवेशसक्सेना, डा. प्रतापानन्दझा; जोधपुरत: प्रो. रामगोपाल:, बेंगलोरत: डा. सीएल प्रभाकर:, कोलकातात: डा. सोमाबासु: असमत: डा. शकुन्तला, अजमेरत: डा. सुनीताखुराना, बरेलीत: डा. श्वेतकेतुशर्मा प्रभृतय: विद्वांस: उपस्थिता: आसन्।

दिल्ली विश्वविद्याअलयस्य लेडी श्रीराम महाविद्यालयस्य छात्रा: सम्मेलनस्यास्य द्वितीयदिवसस्य सांस्कृतिकसन्ध्यायां 'भगवदज्जुकीयम्' प्रहसनम् अभिनीतवत्य:। अस्य कार्यक्रमस्य तृतीयदिवसस्य सांस्कृतिकसन्ध्यायां डा. दीपाकुमारीद्वारा निर्मितस्य डाक्यूमेन्टरी फिल्म 'हिस्ट्री आफ योग' इत्यस्य प्रदर्शनं कारितम्।

सम्मेलनस्यास्य समापनसत्रे विशिष्टातिथि: आसीत् लन्दनस्थ-सेण्ट-जेम्स-विद्यालयस्य निदेशक: तथा 'इफ आई केन' इत्यस्या: संस्थाया: च निदेशक: श्रीयुत: पाल पालमरोजा। तेन उक्तं यत् लन्दनस्य विद्यालयेषु संस्कृतशिक्षणे रुचि: दिनानुदिनं वर्धते।



अन्ताराष्ट्रिय-सम्मेलनमिदं वेव्स-अन्ताराष्ट्रियाध्यक्षस्य प्रो. बलरामसिंहस्य प्रेरणया निदेशनेन च तथा वेव्स-भारतस्य महासचिवमहोदयया प्रो. शशितिवारीद्वारा कार्यान्वितं कृतम्। सम्मेलनस्यास्य अध्यक्षा प्रो. शशितिवारी, जवाहरलालनेहरुविशिविद्यालयस्य दर्शनविभागस्य प्रो.आर.पी. सिंह: उपाध्यक्ष: च आस्ताम्। तिसृणां संस्थानां संयुक्तसहयोगेन सम्मेलनमिमं साफल्येनायोजितम्।